# ३२. अवन्तिदेशस्थ-अभिनन्दनदेवकल्पः ।

**अवन्तिषु** प्रसिद्धस्य[1] सिद्धस्येद्धतरायतेः । **अभिनन्दन**देवस्य कल्पं जल्पामि लेशतः ॥ १ ॥

इह किलेक्ष्**वाकु**वंशमुक्तामणेः श्री**संवरराज**सूनोः **सिद्धार्था**कुक्षिसरसीराजहंसस्य कपिलाञ्छनस्य चामीकररुचेः स्वजन्मपवित्रितश्री**कोसलापुर**स्य सार्द्धधनुःशतत्रितयोच्छ्रायकायस्य चतुर्थतीर्थेश्वरस्य श्रीम**दभिनन्दनदेव**स्य चैत्यं **मालवदेशा**न्तर्वर्ति**मंगलपुर**प्रत्यासन्नायां महाटवीगतायां [2]**मेदपल्ल्या**मासीत् । तस्यां च [3]विचित्रपापकर्मनिर्माणकर्मठतायामजातनिर्वेदा मेदाः प्रतिवसन्ति स्म । अन्यदा तुच्छम्लेच्छसैन्येन तत्रापत्य भग्नं तज्जिनायतनम्; नवखण्डीकृतं च प्रमद्भरतयाऽधिष्ठायकानां कलिकालदुर्ललितानामकलनीयतया च प्रतिहतप्रणतजनडिम्बमपि तच्चैत्यालङ्कारभूतं भगवतो**ऽभिनन्दनदेव**स्य बिम्बम् । केचित्सप्त खण्डानीत्याहुः । तानि च शकलानि सञ्जातमनःखेदैर्मेदैः सम्मील्य एकत्र प्रदेशे धारितानि । एवं वंहीयसि गतवत्यनेहसि हरहसितसित[4]गुणग्रामाभिरामो **धाराडग्रामा**दुपेत्य नित्यं वणिगेकः स्वकलाछेको **वइजा**भिख्यस्तत्र [5]क्रयाक्रयिकारूपां वणिज्यामकार्षीत् । स च परमार्हतस्ततः प्रत्यहं गृहमागत्य देवमपूपुजत् । स ह्यकृतायां देवपूजायां न जातु बुभुजे । ततः पल्लीमुपेयिवानेकदाऽनेकदारुणकर्मभिस्तैरभिदधे स श्राद्धः—किमर्थमन्वहमेहिरेयाहिरां कुरुषे, अस्यामेव पल्ल्यां वणिगुचितभोज्यपूरणकल्पवल्ल्यां किं न भुंक्ष्वे ? । ततश्च भणितं वणिजा—भो राजन्याः ! यावदहमर्हन्तं देवाधिदेवं त्रिभुवनकृतसेवं न पश्यामि न पूजयामि च तावन्न वल्भायां प्रगल्भे । किरातैर्जगदे—यद्येवं देवं प्रति तव निश्चयस्तदा तुभ्यं दर्शयामस्त्वदभिमतं दैवतम् । वणिजा प्रोचे—तथास्तु । ततस्तैस्तानि नवापि, सप्तापि वा, खण्डानि यथावयवन्यासं संयोज्य दर्शितं भगवतो**ऽभिनन्दन**स्य बिम्बम् । तच्च

---

1 C प्रसिद्ध°; नास्ति P । 2 C मेदपल्ल्यां । 3 B चित्र° । 4 B Pa नास्ति 'सित' । 5 P कयक्र° ।

वि० क० ८

शुचितरमम्माणपाषाणघटितं विलोक्य प्रमुदितमुदितवासनातिशयेन तेन वणिग्वरेण ऋजुमनसा नमस्कृतस्तिरस्कृतदुरन्तदुरितो भगवान्, पूजितश्च पुष्पादिभिश्चैत्यवन्दना च विरचिता । ततः स तत्रैव भोजनमकुरुत गुरुतराभिग्रहः । इत्थंकारं प्रतिदिनं जिनपूजानिष्ठामनुतिष्ठति सति तस्मिन् वणिजि, अपरेद्युरुद्यदविवेकातिरेकबहुलैर्नाहलैस्तसात्किमपि द्रव्यं [1]धनायद्भिस्तद्बिम्बं शकलानि युतकीकृत्य क्वचिदपि संगोप्य धृतम् । यावत्पूजावसरे तां प्रतिमामनालोक्य नासौ बुभुजे । ततस्तेन विषण्णमनसा विहितमपानकमुपवासत्रयम् । अथ स मेदैरपृच्छि–किमर्थं नाश्नासि ? । स यथातथमचकथत् । ततः किरातव्रातैरवादि–यदास्मभ्यं गुडं ददासि, तदा तुभ्यं दर्शयामस्तं देवम् । वणिजा बभणे–वितरिष्याम्यवश्यमिति । ततस्तैस्तत् सकलमपि शकलानां नवकं, सप्तकं वा, प्राग्वत् संयोज्य प्रकटीकृतम्, दृष्टं च तेन संयोज्यमानं तद्बिम्बम् । सुतरां विषादनिषादसंस्पर्शकलुषितहृदयः समजनि स श्राद्धधुरीणः । तदनु सात्त्विकतयाभिग्रहमग्रहीद्यावदिदं बिम्बमखण्डं न विलोकये तावन्नौदनमश्नीति । तस्येत्थमनुदिवसमुपवसतस्तद्बिम्बाधिष्ठायकैः स्वप्ने निजगदे–यदस्य बिम्बस्य नवखण्डसन्धयश्चन्दनलेपेन पूरणीयाः, तत इदमखण्डतामेष्यतीति । प्रबुद्धेन तेन प्रातर्जातप्रमोदेन तथैव चक्रे । समपादि भगवानखण्डवपुः । सन्धयश्च मिलिताश्चन्दनानुलेपमात्रेण । क्षणमात्रेण भगवन्तं विशुद्धश्रद्धया सम्पूज्य भुक्तवान् पण्याजीवः पीवरां मुदमुद्वहन्, ददौ च गुडादि मेदेभ्यः । तदन्तरं तेन वणिजा मणिजातमिव प्राप्य प्रहृष्टेन शून्यखेटके पिप्पलतरोस्तले[2] वेदिकाबन्धं विधाय[3] सा प्रतिमा मण्डिता । ततः प्रभृति श्रावकसङ्घाश्चातुर्वर्ण्यलोकाश्चतुर्दिगन्तादागत्य यात्रोत्सवं सूत्रयितुं प्रवृत्ताः । तत्र **अभयकीर्ति**-[4]**भानुकीर्ति-आंबा-राजकुला**स्तत्र मठपत्याचार्याश्चैत्यचिन्तां कुर्वते ।

अथ **प्राग्वाट**वंशावतंसेन **थेहा**त्मजेन साधु**हालाके**न निरपत्येन पुत्रार्थिना विरचितमुपयाचितकम्–यदि मम सूनुर्जनिता तदात्र चैत्यं कारयिष्यामीति । क्रमेणाधिष्ठायकत्रिदशसान्निध्यतः पुत्रस्तस्योदपद्यत **कामदेवा**ख्यः । ततश्चैत्यमुच्चैस्तरशिखरमचीकरत्साधु**हालाकः** । क्रमात्साधु**भावड**स्य दुहितरं परिणायितः **कामदेवः** । पित्रापि **डाहा**ग्रामादाहूय **मलयसिंहा**दयो देवार्चकाः स्थापिताः । **महणिया**भिख्यो [5]मेदः स्वाङ्गुलीं भगवदुद्देशेन कृन्तवान्–किलाहमस्य भगवतोऽङ्गुलीवर्द्धितः सेवक इति । भगवद्विलेपनचन्दनलगनाच्च तस्याङ्गुलिः पुनर्नवीबभूव । तमतिशयमतिशायिनं निशम्य श्री**जयसिंहदेवो मालवेश्वरः** स्फुरद्भक्तिप्राग्भारभास्वरान्तःकरणः स्वामिनं स्वयमपूपुजत् । देवपूजार्थं च चतुर्विंशतिहलकृष्यां भूमिमदत्त मठपतिभ्यः । द्वादशहलवाह्यां चावनीं देवार्चकेभ्यः प्रददा**वबन्ति**पतिः । अद्यापि दिग्मण्डलव्यापिप्रभाववैभवो भगवान**भिनन्दनदेव**स्तत्र तथैव पूज्यमानोऽस्ति ।

**अभिनन्दनदेव**स्य कल्प एष यथाश्रुतम् । अल्पीयान् रचयांचक्रे श्री**जिनप्रभ**सूरिभिः ॥ १ ॥

**॥ इति सकलभूवलयनिवासिलोकाभिनन्दनस्य श्रीअभिनन्दनदेवस्य कल्पः**[†] ॥

॥ ग्रं० ५३, अ० १८ ॥

1 C समानयद्भिः । 2 P °तरोर्मूले । 3 P निधाय । 4 P नास्त्येतन्नाम । 5 B C मेदुः । † P प्रतौ 'इति अभिनन्दनदेवकल्पः ।' इत्येव संक्षिप्तोल्लेखः ।